© 2017 IJSRST | Volume 3 | Issue 7 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
Themed Section: Science and Technology

# परीक्षिन्नाटकचक्रे संवादसौन्दर्यम



**सुधा मिश्रा, शोधच्छात्रा**

राष्ट्रिय संस्कृत संस्थान (मा.वि.वि.)
गङ्गानाथ झा परिसर, इलाहाबाद

गीर्वाणान्ध्रभाषाप्रवीणस्य पण्डित ओगेटिपरीक्षितशर्मणः नाटकचव्रेह सप्तविंशतिः नाटकानि प्रकाशितानि सन्ति। नाटकानां संवाद–लेखनशैली पारम्परिकी एवास्ति। पात्राणां संवादः तु गद्यपद्यमिश्रितरूपेणास्ति। अस्मिन् संवादे बहूनि गीतानि दरीदृश्यन्ते। तत्तु भारतीयशास्त्रीयसङ्गीतस्य प्रतिबिम्बः प्रतीयते। एषां गीतानां रागः तालश्चापि शास्त्रीयपरम्परानुसारी एव प्रतिभाति।

अत्र नाटककारेण नाटकेषु यादृशं सुबोध्यं संस्कृतम् एतेषु दिवसेषु अपेक्ष्यते तादृशमेव संस्कृतं प्रयुक्तम्। नाटके सर्वत्र अल्पाकाराणि सुखोच्चारणयोग्यानि च वाक्यानि सन्ति। उदाहरणार्थं परिणीतानाटकस्य एकः संवादः दर्शनीयोऽस्ति –

राधाकृतौ दम्पती पञ्चतिसहस्ररूप्यकाणि वरशुल्कम् अपृच्छताम् । सर्वं सन्नाहाः अस्माभिः करणीयाः सन्ति।

जानकी – मातः ! पिता इयन्तं धनं कथं दास्यति ।

गिरिधरः – बाले ! तव किमर्थम् एतत्। त्वं वरदर्शनानन्तरं तवाङ्गीकारं विशदय। यदि तुभ्यं रोचते सः, विवाहकरणे बाध्यता मम विद्यते।

जानकी – पितः इयन्तं धनं त्वं दातुम् उद्युक्तः। पितः ! विंह त्रिंशत्सहस्ररूप्यकाणि दत्वा तां बालं व्रेहष्यसि विंह मदर्थम्।

गिरिधरः – बाले! अत्र क्रयदृविक्रयस्य सम्बन्धो नास्ति। तौ दम्पती सम्पन्नौ। तयोः महान् प्रसादः वर्तते। तयोः महत् भूखण्डं च विद्यते। बालः अमेरिकादेशात् प्रत्यागतः। एम.डि. प्राचार्यः।

जानकीकृते सम्पन्नकुटुम्बिकाः तथापि इयन्तं धनं काङ्क्षन्ते। ते सत्यम् अत्याशा पूरिताः ।

गिरिधरः – आशायाः अवधिः नास्ति जगति बाल!

जानकी – यदि इयान् वरशुल्कः भवता दीयते तर्हि अयं विवाहसम्बन्धः मम अनपेक्षितो भविष्यति।

राधाकृबाले! विंह त्वं पाषण्डा भवसि। ते सुसम्पन्नाः भूखण्डसहिताः योग्याः। भवतु नाम। आवां कुर्वः ते विवाहम्। तव चिन्ता माऽस्तु।

जानकी – मम विवाहं कृत्वा भवन्तौ भिक्षापात्रं गृहीत्वा भिक्षाटनं करिष्यतः। मे अनुजौ पाठशालां विसृज्य भिक्षुकौ भविष्यतः। माता यस्य कस्यापि गृहे पात्रप्रक्षालनं कृत्वा जीवितं यापयिष्यति। अहं श्वसुरगृहे सुखमनुभवन्ती वसिष्यामि। भवतः अभिप्रायः सम्यक् विद्यते ।

IJSRST184965 | Received: 02 Oct 2017 | Accepted: 16 Oct 2017 | September-October-2017 [(3) 7: 1322-1323 ]

राधा – विंह्न ब्रवीषि जानकि!

जानकी – नहि शृणोमि भवतां वाक्यम्। न मे रोचते वरशुल्कं दत्वा परिणयकरणम्।

नाटककारेण परीक्षितशर्मणा सामाजिकनाटकेषु आङ्ग्लशब्दानां प्रयोगः कृतः। यथा – (ततः प्रविशन्ति क्रमेण अतिथयः। शशिः, चन्द्रिका, अरुणः, छाया च। शशिः घण्टा पेन्टुं अन्तः षर्टुं कृत्वा कलाकारशिरोजैः पूर्णपादत्राणे बध्वा प्रविशति। चन्द्रिकाऽपि तथैव प्रविशति। अरुणः आपादमस्तवंह्न सूट्यां धूम्रनलिकां मुखे निक्षिप्य पीयमानः प्रविशति छाया बाहुहीनं निचोलं धृत्वा सिगरेटुं पिबन्ती प्रविशति[१]।

परीक्षितशर्मणः नाटकेषु सुभाषितानाम् अतीव सम्यक् प्रकारेण प्रयोगः दृश्यते। नाट्यकारः कलानुरागी, प्रशिक्षितः,सङ्गीतकारः गायकश्चास्ति। उदाहरणार्थं– कचदेवयानीये नाटके देवयान्याः गीतानि। भीष्मप्रतिज्ञायाः धीवरगानम्, श्रावणे मेघरागगीतम् प्रभृतीनि गीतानि नाटकेषु प्रयुक्तानि सन्ति।

नाटककारस्य पण्डितशर्मणः कविरूपमप्यत्र स्थाने–स्थाने ध्वनितं भवति। तद्विरचितानां श्लोकानां रचनाप्रवाहः, मृदु–पदावली, भावप्रवणता, अलज्ररसौन्दर्यञ्च मर्मस्पर्शि वर्तते। नाटकीयतत्त्वानां प्रवाहकता, काव्यपरकभावनात्मकता च पात्राणां मानसिकदशानामभिव्यक्तौ समर्थः सिद्धयतिः। यथा–

कवोष्णचुम्बनैस्तूर्णं गाढालिङ्गनसौख्यदैः।
कुरु रे मे कुचद्वन्द्वं चूर्णं निष्पीडनैः कच[२]।।

परीक्षिन्नाटकचव्रेह्न नाटककारस्य भाषायाः सरलता, प्रवाहमयता भावगम्यता च द्रष्टव्याः सन्ति। अत्र प्रयुक्ता नाट्योचिता भाषा नाटकस्य सफलतायाः सम्प्रेषणीयतायाश्च आधारोऽस्ति । वस्तुतः यस्य कस्यापि नाटकस्य सर्वाधिकः संवेदनशीलः पक्षः तस्य भाषा, संवादश्च भवतः । आधुनिकनाटकस्य सर्वाभिः विशेषताभिः युक्तस्यैतस्य नाट्यकारस्य नाटकानां भावपक्षः कलापक्षश्च लेखकस्य साहित्यिकरेखाचित्रमूर्ध्वमुपस्थापयतः ।

**सन्दर्भ**


१. परीक्षिता, पृ. १३

2. अपराजितम्, पृ. ४

3. कचदेवयानीयम्, पृ. १५